*ŚRUTAVEGĀYA*

*te stotavyā ajadabaravañjādayaḥ ṣaṭśatāni*
*saṃkhyā yeṣām aticarati saṃpūraṇīyā triṣaṣṭyā*
*yeṣāṃ rūpeṣu kila guṇavṛddhī viśiṣyeta eva*
*ye ca prāyeṇa samabhihitāḥ seṭ ca veṭ cety aṇiṭ ca*

*yeṣāṃ śāstreṣu subahuvidheṣv artham anveṣaṇena*
*sarveṣu vyākaraṇapadakośeṣu kautūhalena*
*vyutpattiṃ ca prathamadivasebhyo samārabhya satyām*
*nirdeṣṭuṃ vā parikathayituṃ vā punaḥ śakta ekaḥ*

*viśvān vedān parisamanugatyottamān ye catvāraḥ*
*ṛksāmātharvayajur iti nāmāni yāḥ saṃhitā vā*
*yāny ākhyātāni śatapathachāndogyakauṣītakīti*
*anyāny evaṃ gaṇayitum aśakyāni vā brāhmaṇāni*

*keneśātmādibhir upaniṣadbhiḥ sadā saṃyutāni*
*yāny anyābhiś ca bṛhadatiriktāni vāraṇyakāni*
*nāpasmṛtyaikadaśaparimāṇāni sūtrāṇi yeṣu*
*gṛhyaśrautāni ca paridadhe śulvadharmāṇi cāpi*

*yeṣāṃ arthā aśanaśayanābhyām samārabhya śeṣe*
*vistīryante yabhanakhudane vyāpnuvantaḥ samantāt*
*āryāṇāṃ saṃpariviniravānvādibhiḥ saṃdadhānāḥ*
*bhāṣāyā eva suviracitā dhātavaḥ śrautavegāḥ*

Jost Gippert, December 1997, on Chlodwig Werba's Verba Indoarica

# श्रुतवेगाय

ते स्तोतव्या अजदबरवञ्जादयः षट् शतानि
संख्या येषामतिचरति सम्पूरणीया त्रिषष्ट्या ।
येषां रूपेषु किल गुणवृद्धी विशिष्येत एव
येच प्रायेण समभिहिताः सेट् च वेट् चेत्यनिट् च ॥१॥

येषां शास्त्रेषु सुबहुविधेष्वर्थमन्वेषणेन
सर्वेषु व्याकरणपदकोशेषु कौतूहलेन ।
व्युत्पत्तिंच प्रथमदिवसेभ्यो समारभ्य सत्याम्
निर्देष्टुंवा परिकथयितुंवा पुनः शक्त एकः ॥२॥

विश्वान्वेदान्परिसमनुगत्योत्तमान्ये चत्वारः
ऋक्सामाथर्वयजुरिति नामानि याः संहिता वा ।
यान्याख्यातानि शतपथछान्दोग्यकौशीतकीति
अन्यान्येवं गणयितुमशक्यानि वा ब्राह्मणानि ॥३॥

केनेशात्मादिभिरुपनिषद्भिः सदा संयुतानि
यान्यन्याभिश्च बृहदतिरिक्तानि वारण्यकानि ।
नापस्मृत्यैकदशपरिमाणानि सूत्राणि येषु
गृह्यश्रौतानिच परिदधे शुल्वधर्माणिचापि ॥४॥

येषामर्था अशनशयनाभ्यां समारभ्य शेषे
विस्तीर्यन्ते यभनखुदने व्याप्नुवन्तः समन्तात् ।
आर्याणां सम्परिविनिरवान्वादिभिः संदधानाः
भाषाया एव सुविरचिता धातवः रौतवेगाः ॥५॥

Jost Gippert, December 1997, on Chlodwig Werba's Verba Indoarica